# आचार्यप्रथमवर्षम्

## द्वितीयपत्रम्-नव्यन्यायः

## शैक्षिकनिष्पत्तिः

ग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः

पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-

- ❖ हेत्वाभासनिरूपणे सङ्गतिं, हेत्वाभासानां तत्त्वनिर्णय-विजयप्रयोजकत्वं, हेत्वाभाससामान्यलक्षणं, तद्घटकानुमितिपदस्य लाक्षणिकत्वं, लक्षणसमन्वयं, दलसार्थक्यं, प्रकृतग्रन्थस्य लिङ्गोपधानमताभिप्रायकत्वनिरासप्रकारं चावगन्तुं शक्नुवन्ति।
- ❖ लक्षणस्थयथार्थपदनिर्वचनम्, अनेकविधभ्रमं, द्विविधव्यभिचारं, सर्वांशे प्रमात्वं, मतभेदेन यथार्थपदसार्थक्यं, प्रथमलक्षणस्य ज्ञायमानदोषप्रतिबन्धकतावादिमताभिप्रायकत्वं, प्रथमलक्षणपरित्यागबीजं चावगच्छेयुः।
- ❖ अनुमितिप्रतिबन्धकताघटितहेत्वाभासलक्षणं, लक्षणे तृतीयाविभक्तेः अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वपरत्वं, ज्ञानपदस्य निश्चयविशेषपरत्वम्, अवच्छेदकत्वपदार्थनिर्वचनं, लक्षणे अव्यापकविषयताशून्यत्वनिवेशनप्रकारं, स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽनुपपत्तिं चावगच्छेयुः।
- ❖ प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशप्रकारं, विशिष्टद्वयाघटितत्वपरिष्कारं, विशिष्टान्तराघटितत्वपरिष्कारं, तद्घटकदलसार्थक्यं, नचचतुष्टयकल्पं, स्वसजातीयविशिष्टान्तराघटितत्वकल्पं च विजानीयुः।

- “ह्रदे वह्नेः साधने धूमो दुष्टः” इत्यत्र पदार्थनिर्वचनपूर्वकशाब्दबोधप्रकारं, उभयाभावघटितलक्षणावतरणं, लक्षणसमन्वयं, दलसार्थक्यं, लक्षणे उभयविधव्याप्तिनिवेशावश्यकतां, विरोधिविषयताप्रयुक्तत्वदलनिर्वचनं, विशिष्टान्तराघटितत्वविशेषणस्य अर्थान्तरं, निर्वह्निर्वह्निमान् इत्यादौ अव्याप्तिशङ्कां, तत्परिहारं, मतान्तरेण तत्र अव्याप्तिवारणप्रकारस्य परिशीलनं च ज्ञातुं शक्नुवन्ति।
- निश्चयत्वलक्षणं, प्राचीनाभिप्रेतलघुलक्षणनिर्वचनप्रकारं, ज्ञानविरोधित्वस्वरूपम्, अन्यतमत्वघटितलक्षणे दोषाणामनुगतरूपेण प्रवेशनप्रकारं, तल्लक्षणस्य अव्याप्त्यादिशङ्कापरिहारौ, सम्बन्धविशेषेण दोषवत्वघटितं दुष्टलक्षणं, मतभेदेन लक्षणार्थनिर्वचनप्रकारं, तत्परिशीलनं चाधिगच्छेयुः।